Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ यक्षिणीमन्त्रा लिख्यन्ते —

सर्वासां यक्षिणीनां तु ध्यानं कुर्यात्समाहितः ।
भगिनीमातृपुत्रीस्त्रीरूपतुल्यं यथेप्सितम् ॥

ओं ह्रीं रतिप्रिये स्वाहा । इत्यष्टार्णो मन्त्रः । ऋष्यादयः प्रसिद्धाः ।

अस्य प्रयोगः — शङ्खालिप्तपटे देवीं गौरवर्णां धृतोत्पलाम् ।
सर्वालङ्कारिणीं दिव्यां समालिख्यार्चयेत्ततः ।
जातीपुष्पैस्सोपचारैः सहस्रैकं ततो जपेत् ।
त्रिसन्ध्यं सप्तरात्रं तु ततो रात्रौ शुचिर्जपेत् ॥
अर्धरात्रगते देवी समागत्य प्रयच्छति ।
पञ्चविंशतिदीनारान् प्रत्यहं तोषिता सती ॥

अथ कम्बलकामन्त्रः —

ओं चं वः कम्बळके गृह्ण पिण्डं पिशाचिनी(नि) स्वाहा । अस्य प्रयोगः — एकविंशद्दिनं यावत् उदयास्तमयं जपेत् ।
नित्यं सायं स्वमाहारपिण्डं हर्म्योपरि क्षिपेत् ॥

त्रिसप्ताहेन सा तुष्टा शय्यां गत्वा पिशाचिनी ।
पञ्चविंशतिदीनारान् ददाति प्रतिवासरम् ॥

कर्णे कथयति क्षिप्रं यद्यत्पृच्छत्यसौ क्रमात् ।

अथ चन्द्रासुमतिमन्त्रः —

ओं गुळु गुळु चन्द्रासुमति सुरप्रव्रजति हुळु हुळु चन्द्रे चन्द्रगिरे स्वाहा । अस्य प्रयोगः —

गुहाचरा(ला)न्तरेकान्ते लक्षमेकं मनुं जपेत् ।
पुष्पं धूपं चरुं पूजां नित्यं, कुर्यात्प्रयत्नतः ॥

पञ्चामृतैर्दशांशेन हुत(ते) देवी प्रसीदति ।
दीनाराणां सहस्रैकं प्रत्यहं तोषिता सती ॥

(ददातीति वाक्यशेषः ॥)

अथ सुरसुन्दरीमन्त्रः —

ओं आगच्छागच्छ सुरसुन्दरी(रि) स्वाहा ॥

एकलिङ्गे महादेवीं त्रिसन्ध्यं पूजयेत्सदा ।
धूपं दत्वा जपेन्मन्त्री त्रिसन्ध्यं त्रिसहस्रकम् ॥

मासमेकं ततो याति यक्षिणी सुरसुन्दरी ।
दत्वाऽर्घ्यं प्रणमेन्मन्त्री स्मृतं सा तु प्रयच्छति ॥

देवि दारिद्र्यदग्धोस्मि तन्मे नाशकरी भव ।
ततो ददाति सा तुष्टा विनाऽऽयुश्चिरजीवितम् ॥

अथ अनुरागिणीमन्त्रः —

ओं ह्रीं अनुसारिणी (णि) मैथुनप्रिये ।

अस्य प्रयोगः —

कुंकुमेन समालिख्य भूमिदेशे सलक्षणम् ।
प्रतिपत्तिथिमारभ्य पूजां कृत्वा जपेत्ततः ॥

त्रिसन्ध्यं त्रिसहस्रं तु मासान्ते पूजयेन्निशि ।
संजप (जपेत्) त्वर्धरात्रे तु समागत्य प्रयच्छति ॥

दीनाराणां सहस्रैकं प्रत्यहं परितोषिता ।

दीनारं स्वर्णम् ॥

अथ मनोहरामन्त्रः—

ओं ह्रीं सर्वकामदे मनोहरे स्वाहा। अस्य प्रयोगः—

नदीतीरे शुभे देशे चन्दनेन सुमण्डलम्।
विधाय पूजयेद्देवीं ततो मन्त्रयुतं जपेत्॥

त्रिसप्ताहं जपेदेवं प्रसन्ना वितरेत्सदा।
दीनाराणां सहस्रैकं व्ययीकुर्यादिने दिने॥

विना व्ययेन सा क्रुद्धा न ददाति कदाचन॥

अथ शङ्खचारिणीमन्त्रः—

ओं शङ्खचारिणे(णि) शङ्खाभरणे द्रां द्रीं ह्रूं श्रीं स्वाहा। अस्य प्रयोगः—

मन्त्रायुतं जपेन्मन्त्री प्रातस्सूर्योदये सति।
मासमेकं जपेदेवं पूजां कुर्यात् दिने दिने॥

शङ्खसंलिप्तपट्टे तु शुक्लपुष्पैः सपायसैः।
दशांशं होमयेत्साज्यैः इन्धनैः करवीरजैः॥

ददाति शङ्खिनी तुष्टा नित्यं रूपकपञ्चकम्।

अथ माणिभद्र(यक्ष)मन्त्रः—

ओं नमो माणिभद्राय नमः। पूर्णभद्राय नमो महायक्षसेनाधिपतये मोट मोट धारय स्वाहा। अस्य प्रयोगः—

साहस्रमष्टकं मन्त्रं जपेत् सप्तदिनावधि।
प्रत्यहं माणिभद्राख्यः प्रयच्छत्येकरूपकम्॥

रूपकं रूपे॥

अथ स्वामीश्वरीमन्त्रः—

ओं ह्रूं आगच्छागच्छ स्वामीश्वरी(रि)स्वाहा । अस्य प्रयोगः—

एकासने शुचौ देशे त्रिसन्ध्यं त्रिसहस्रकम् ।
मासमेकं जपेन्मन्त्री ततः पूजां समारभेत् ॥

पुष्पधूपादिनैवेद्यैः प्रदीपैर्घृतपूरितैः ।
रात्रावभ्यर्चयेत्सम्यक् सुस्थिरस्सुप्रसन्नधीः ॥

अर्धरात्रे गते देवी समागत्य प्रयच्छति ।
रसं रसायनं दिव्यं वस्त्रालङ्कारभूषणम् ॥

अथ वटयक्षिणीमन्त्रः—

ओं ह्रूं श्रीं वटवासिनी (नि) यक्षकुलप्रसूते वटयक्षिणी(णि) एह्येहि स्वाहा । अस्य प्रयोगः—

त्रिपथस्थवटाधस्थो रात्रौ मन्त्रं जपेत्सदा ।
लक्षत्रयं ततस्सिद्धो (द्धा) देवी स्याद्वटयक्षिणी ॥

वस्त्रालङ्करणं दिव्यं रसं सिद्धं रसायनम् ।
दिव्याञ्जनं च सा तुष्टा साधकाय प्रयच्छति ॥

अथ विशालामन्त्रः—

ओं विशालेशे द्रां द्रं क्लीं एहि एहि स्वाहा । अस्य प्रयोगः—

चिञ्चावृक्षतले मन्त्रं लक्षमावर्तयेत् शुचिः ।
विशाला वितरेत्तुष्टा रसं दिव्यं रसायनम् ॥

चिञ्चावृक्ष–चिञ्चचेंजाड புளியமரம்.

अथ चन्द्रिकामन्त्रः—

ओं ह्रीं चन्द्रिके हंसः स्वाहा । अस्य प्रयोगः —

शुक्लपक्षे जपेत्तावद्यावत् दृश्येत चन्द्रमाः ।
प्रतिपत्पूर्वपूर्णान्तं तावल्लक्षमिमं जपेत् ॥

अमृतं चन्द्रिकादत्तं पीत्वाऽयममरो भवेत् ।

अथ हंसी (चेटी) मन्त्रः —

ओं हंसः सर्वलोकलोचनानि बन्ध बन्ध देव्याज्ञापयति स्वाहा । अस्य प्रयोगः —

हृदि ध्यात्वा जपेद्रात्रौ हंससंस्थांस(च)चेटकाम् ।
योगं ददाति सा तुष्टा जरामृत्युविनाशनम् ॥

अथ विचित्रामन्त्रः —

ओं विचित्रे विचित्ररूपेण सिद्धिं कुरु कुरु स्वाहा । अस्य प्रयोगः —

लक्षमेकं जपेन्मन्त्री वटवृक्षतले शुचिः ।
बन्धूककुसुमैः पश्चात् मध्वाज्यक्षीरमिश्रितैः ॥

दशांशं योनिकुण्डे तु हुत्वा देवी प्रसीदति ।
विचित्रा साधकस्यैव प्रयच्छेदीप्सितं फलम् ॥

इति यक्षिणीमन्त्रास्समाताः ॥